[६७४] गोर्यूतौ छन्दसि। (म.भा. ३.५४)

गोशब्दस्य यूतौ परतः छन्दसि विषये [1]वान्तादेशो वक्तव्यः। '[2]आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्' (ऋ. ३.६२.१६)। छन्दसि इति किम्? गोयूतिः।

[६७५] अध्वपरिमाणे च। (म. भा. ३. ५४)

गोर्यूतौ परतो [3]वान्तादेशो वक्तव्यः। गव्यूतिमात्रमध्वानं गतः॥

## धातोस्तन्निमित्तस्यैव। (८०/६४)

एचः इति वर्तते, वान्तो यि प्रत्यये इति च। धातोर्य एच् तन्निमित्तो यकारादिप्रत्ययनिमित्तः, तस्य यकारादौ प्रत्यये परतो [4]वान्तादेशो भवति। लव्यम्। पव्यम्। अवश्यलाव्यम्। अवश्यपाव्यम्। धातोः इति किम्? प्रातिपदिकस्य नियमो मा भूत्। तत्र को दोषः? बाभ्रव्यः इत्यत्रैव स्यात्, इह [5]न स्यात् गव्यम्, नाव्यम् इति। तन्निमित्तस्य इति किम्? [6]अतन्निमित्तस्य मा भूत्। उपोयते। औयत। लौयमानिः। पौयमानिः। 'अत इञ्' (४.१.९५/१०९५)। एवकारकरणं किम्? धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूत् इति तन्निमित्तस्य हि धातोश्चाधातोश्च भवति। बाभ्रव्यः। [7]अवश्यलाव्यम्। लव्यम्॥

## क्षय्यजय्यौ शक्यार्थे। (८१/६७)

क्षि जि इत्येतयोर्धात्वोः यति प्रत्यये परतः शक्यार्थे गम्यमाने एकारस्य अयादेशो निपात्यते। शक्यः क्षेतुम् क्षय्यः[8]। शक्यो जेतुम् जय्यः। शक्यार्थे इति किम्? क्षेयं पापम्। जेयो वृषलः॥

## क्रय्यस्तदर्थे। (८२/६६)

क्रीणातेः धातोः तदर्थे क्रयार्थं यत् तस्मिन्नभिधेये यति प्रत्यये परतः अयादेशो निपात्यते। [9]क्रय्यो गौः। क्रय्यः कम्बलः। क्रयार्थं यः प्रसारितः स उच्यते। [10]तदर्थे इति किम्? क्रेयं नो धान्यं, [11]न चास्ति क्रय्यम्॥

## भय्यप्रवय्ये च च्छन्दसि। (८३/३८१७)

बिभेतेर्धातोः प्रपूर्वस्य च वी इत्येतस्य यति प्रत्यये परतः छन्दसि विषये अयादेशः निपात्यते। 'भय्यं किलासीत्' (काठ. सं. १३.४)। वत्सतरी प्रवय्या। भय्येति 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इत्यपादाने यत् प्रत्ययः। बिभेत्यस्माद् इति भय्यम्। प्रवय्या इति स्त्रियामेव [12]निपातनम्। अन्यत्र प्रवेयम् इत्येव भवति। छन्दसि इति किम्? भेयम्। प्रवेयम्।

[६७६] ह्रदय्या आप उपसङ्ख्यानम्[13]। (म.भा. ३.५५)

ह्रदय्या आपः (म.भा. ३.५५)। ह्रदे भवा, 'भवे छन्दसि' (४.४.११०/३४५६) इति यत् प्रत्ययः॥

---

1. आदेशः क. 2. युवां यौ इत्यधिकम् क. 3. वादेशः क. 4. वादेशः क. 5. तु इत्यधिकम् क. फ. 6. अन्यनिमित्तस्य फ. 7. अवश्यलाव्यः लव्यः क. 8. व्याधिः इत्यधिकम् ग. 9. क्रय्या फ. ह, क्रय्या नौः ग. 10. क्रय्य इति किम् फ. 11. न चेहास्ति ह. फ. 12. निपातनात् फ. 13. कर्तव्यम् इत्यधिकम् फ.